# आम्बेडकर-महाविद्यालये संस्कृतदिवस-कार्यक्रमः

त्रिपुराराज्ये ऊनकोटी-मण्डलस्य फटिकराय-जनपदस्थे आम्वेडकर-महाविद्यालये संस्कृतविभाग-अनौपचारिक-संस्कृत-शिक्षण-केनद्रयोः सहयोगेन अगस्ट-मासस्य एकत्रिंशत्तमे दिनाङ्के संस्कृतदिवसः आयोजितः। कार्यक्रमे मुख्यातिथिरूपेण राष्ट्रिय-संस्कृत-संस्थानस्य एकलव्य-परिसरस्य शिक्षिका डा. मञ्जुषा-ठामदेव-महोदया, अध्यक्षरूपेण महाविद्यालयस्य मुख्यः डा. सुव्रत-शर्मा-महोदयः च आसताम्। सभायां महाविद्यालयस्य संस्कृतविभागाध्यक्षः डा.अनिल-कुमार-आचार्यः स्वागतभाषणम् उपस्थापितवान्। अनौपचारिक-संस्कृत-शिक्षण-केन्द्रस्य शिक्षिका श्रीमती सुशान्ति-देवनाथः मञ्च परिचालनां कृतवती च। अपि च कार्यक्रमे महाविद्यालयस्य संस्कृपठनेच्छुकाः च्छात्राः, शिक्षकाः च उपस्थिताः आसन्। सभायां प्रामुख्येन मुख्यातिथिभिः स्वभाषणेन संस्कृतपठनस्य उपकारिता समुपस्थापिता। कार्यक्रमोऽयं प्रदीपप्रज्वलनेन सरस्वतीवन्दनया च प्रारम्भः अभवत्। पश्चात् माहाविद्यालयस्य बालिकाभिः स्वागतसङ्गीतः उपस्थापितः। राष्ट्रियगानेन कार्यक्रमोऽयं समाप्तः अभवत्।




